## तुन्दशोकयोः परिमृजापनुदोः । (५/२९१९)

तुन्दशोकयोः कर्मणोरुपपदयोः परिमृजापनुदोः धात्वोः कप्रत्ययो भवति । तुन्दपरिमृज आस्ते । शोकापनुदः पुत्रो जातः (म. भा. २.९८) ।

[२३१] आलस्यसुखाहरणयोः इति वक्तव्यम् । (म. भा. २.९८)

अलसस्तुन्दपरिमृज [1]उच्यते । तुन्दपरिमार्जः एवान्यः । सुखस्याहर्ता शोकापनुदः[2] । शोकापनोदः एवान्यः ।

[२३२] कप्रकरणे मूलविभुजादिभ्यः उपसङ्ख्यानम् । (म.भा. २.९८)

मूलानि विभृजति इति मूलविभुजो रथः । [3]नखमुचानि धनूंषि । काकगुहास्तिलाः । कौ मोदते कुमुदम् ॥

## प्रे दाज्ञः । (६/२९२०)

सोपसर्गार्थ आरम्भः । ददातेः जानातेश्च धातोः [4]प्रेणोपसृष्टात् कर्मण्युपपदे कप्रत्ययो भवति । अणोऽपवादः । सर्वप्रदः । पथिप्रज्ञः । प्रे इति किम् ? गोसन्दायः[5] ॥

## समि ख्यः । (७/२९२१)

सोपसर्गार्थः आरम्भः । संपूर्वात् ख्या इत्येतस्माद् धातोः कर्मण्युपपदे कप्रत्ययो भवति । [6]अणोऽपवादः । गां संचष्टे गोसङ्ख्यः[7] ॥

## गापोष्टक् । (८/२९२२)

कर्मण्य[8]नुपसर्गे इति [9]वर्तते । गायतेः पिबतेश्च धातोः कर्मण्युपपदेऽनुपसर्गे टक् प्रत्ययो भवति । [10]कस्यापवादः । शक्रं गायति शक्रगः, शक्रगी । सामगः, [11]सामगी ।

[२३३] सुराशीध्वोः पिबतेरिति वक्तव्यम् । (म. भा. २.९९)

सुरापः, सुरापी । शीधुपः, शीधुपी । सुराशीध्वोः इति किम् ? [12]क्षीरपा ब्राह्मणी । पिबतेः इति किम् ? सुरां पाति इति सुरापा । अनुपसर्गे इत्येव, [13]शक्रसङ्गायः । [14]सामसङ्गायः ।

[२३४] बहुलं[15] छन्दसीति [16]वक्तव्यम् । (म. भा. २.९९)

या ब्राह्मणी सुरापी भवति [17]नैनां देवाः पतिलोकं नयन्ति (म. भा. २.९९) । या ब्राह्मणी सुरापा भवति नैनां देवाः पतिलोकं नयन्ति (म. भा. २.९९) ॥

---

1. आस्ते अ. 2. इति इत्यधिकम् फ, पुत्रो जातः इत्यधिकम् अ. फ. 3. नखमुच्यानि फ. 4. प्रोपसृष्टात् फ. 5. वडवासंदायः इत्यधिकम् फ, अश्वसंदायः इत्यधिकम् ग. 6. अणोऽपवादः नास्ति अ. क. फ. 7. पशुसंख्यः इत्यधिकम् अ. ब. क. ग. 8. अनुपसर्गात् फ. 9. द्वयमप्यनुवर्तते फ. 10. कप्रत्ययस्य फ. 11. सामगी नास्ति फ. 12. क्षीरं पिबति इति इत्यधिकम् क. 13. शक्रसंगायः नास्ति अ, वक्त्रसंगायः फ, चक्रसंगायः ब. ड. 14. सामसंगायः नास्ति फ. 15. सञ्ज्ञा इत्यधिकम् फ. 16. वा इत्यधिकम् क. 17. न तां अ.